# ॥ શ્રીશારદામાહાત્મ્યમ્ ॥

.. shrIshAradAmAhAtmyam ..

sanskritdocuments.org

January 4, 2017

# .. shrIshAradAmAhAtmyam ..

# ॥ શ્રીશારદામાહાત્મ્યમ્ ॥

## Sanskrit Document Information

Text title : shAradAmAhAtmyam

File name : shAradAmAhAtmyam.itx

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shankara shankara_2000 at yahoo.com

Proofread by : P. P. Narayanaswami swami at mun.ca, PSA Easwaran

Latest update : November 27, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 4, 2017

*sanskritdocuments.org*

# ॥ શ્રીશારદામાહાત્મ્યમ્ ॥

ૐ અથ શારદામાહાત્મ્યમ્ ॥

ભૈરવ્યુવાચ ।

વદ સત્યં મહાદેવ શારદાવનમુત્તમમ્ ।
શાણ્ડિલ્યો યત્ર વૈ ગત્વા સર્વાન્કામાનવાપ્તવાન્ ॥ ૧॥

અનાદિનિધના દેવી યથા ભૂલોકમાગમત્ ।
શારદા નામ સા શક્તિસ્ત્રિધા રૂપમધારયત્ ॥ ૨॥

તસ્યા માહાત્મ્યમીશાન વદ લોકહિતેપ્સયા ।
કા ચ દેવી પરા યાસૌ શારદાનામધારિણી ॥ ૩॥

ભૈરવ ઉવાચ ।

શૃણુ વક્ષ્યે મહાદેવિ શારદાવનમુત્તમમ્ ।
યસ્ય દર્શનમાત્રેણ પરાં સિદ્ધિમવાપ્નુયાત્ ॥ ૪॥

માતઙ્ગકન્યાસઙ્ગાચ્ચ સમ્ભૂતસ્તત્સરૂપકઃ ।
શાણ્ડિલ્યો નામ તનુજો મહર્ષેર્ભાવિતાત્મનઃ ॥ ૫॥

શ્યામાઙ્ગઃ સ તમોરૂપઃ પિત્રાજ્ઞપ્તશ્ચચાર હ ।
ઘોરં તપો મહાદેવિ મહાદેવાદ્રિસંનિધૌ ॥ ૬॥

જગત્ત્રાણાદિકૃચ્છક્તિજપધ્યાનપરાયણઃ ।
નિરાહારો યતાત્મા સ દધ્યૌ દેવીં સનાતનીમ્ ॥ ૭॥

એવં તુ ધ્યાયતસ્તસ્ય શાણ્ડિલ્યસ્ય મહાત્મનઃ ।
પ્રાદુર્બભૂવ તુ મહચ્છ્યામલં તેજ ઉત્તમમ્ ॥ ૮॥

અદ્ભુતં તન્મુનિર્દૃષ્ટ્વા વિસ્મિતો ન શશાક હ ।
કિઞ્ચિદ્વક્તું ચેષ્ટિતું વા સ્થાણુભૂતો મહેશ્વરિ ॥ ૯॥

ક્ષણેનાન્તર્દધે તત્તુ તેજઃ શ્યામલમુત્તમમ્ ।
મુનિઃ સ વિસ્મિતો ભૂયઃ પ્રેક્ષ્યાન્તર્ધાનમાગતમ્ ॥ ૧૦॥

સસ્માર પિતરં તત્ર શાણ્ડિલ્યો વન ઉત્તમે ।
તેનાપિ પ્રેષિતસ્તત્ર નારદો મુનિસત્તમઃ ॥ ૧૧॥

આગત્ય નારદઃ પ્રાહ શાણ્ડિલ્યં મુનિસત્તમમ્ ।
ધ્યાયસ્વ ભૂયો વિપ્રાગ્ર્ય યેન દર્શનમાપ્સ્યસિ ॥ ૧૨॥

શ્યામલાં શ્યામલાઙ્ગીં તાં શક્તિં શક્તિમતોઽનઘામ્ ।
દૃષ્ટ્વા તુ તામઘં સર્વં નાશમાયાતિ તત્ક્ષણાત્ ॥ ૧૩॥

ઇત્યુક્ત્વાન્તર્દધે તત્ર નારદો મુનિસંનિધૌ ।
શ્રુત્વા દેવર્ષિવચનં પુનર્દધ્યૌ સુરેશ્વરિ ॥ ૧૪॥

શતવર્ષં ધ્યાનપરઃ શ્યામાઙ્ગીં દૃષ્ટવાન્મુનિઃ ।
નુત્વા સ્તુત્વા ચ વિધિના શ્યામાઙ્ગીં તાં સુરેશ્વરિ ॥ ૧૫॥

સોવાચ તં મહાભાગ વરં વરય સુવ્રત ।
શ્રુત્વા તુ તદ્વચઃ સૌમ્યં વરદા ચેન્મહેશ્વરિ ॥ ૧૬॥

મમાઙ્ગાત્ સકલં પાપં વિલયં યાતુ તત્ક્ષણાત્ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય શાણ્ડિલ્યસ્ય મહાત્મનઃ ॥ ૧૭॥

પ્રોવાચ શ્યામલા દેવી પુત્ર સર્વમવાપ્સ્યસિ ।
ઇતિ ગચ્છ મહારાષ્ટ્રં શ્યામલં નામ નામતઃ ॥ ૧૮॥

તત્ર દ્રક્ષ્યસિ તાં દેવીં શારદાં ત્રિવિધાત્મિકામ્ ।
તતઃ પ્રાપ્સ્યસિ સ્વં રૂપં બ્રાહ્મમેવ ન સંશયઃ ॥ ૧૯॥

ઇત્યુક્ત્વા શાણ્ડિલ્યમુનિં દેવી ચાન્તર્દધે તદા ।
સ્મૃત્વા વચો મહાદેવ્યાઃ શ્યામલાયા મુનીશ્વરઃ ॥ ૨૦॥

પ્રતસ્થે શ્યામલં નામ વિષયં સાર્વકામિકમ્ ।
તત્ર ગત્વા મુનિર્ધ્યાનરતો ઘોષં સમૃદ્ધિદમ્ ॥ ૨૧॥

ઘોષે ધ્યાત્વા મહાદેવીં દદર્શાગ્રસ્થિતાં સતીમ્ ।
સ્તુતા તત્ર મહેશાની અગ્ર એવાદિશન્મુનિમ્ ॥ ૨૨॥

ઇતોઽદૂરે મુનિશ્રેષ્ઠ શારદાયા વનં મહત્ ।
તત્ર પ્રવિષ્ટસ્ય મુનેસ્તમો નશ્યતિ તત્ક્ષણાત્ ॥ ૨૩॥

તમોનાશે ચ સ્વામેવ પ્રકૃતિં પ્રાપ્સ્યસિ ધ્રુવમ્ ।
ઇત્યુક્ત્વાન્તર્દધે દેવી હયશીર્ષાશ્રમે મુનિઃ ॥ ૨૪॥

તતો વનં સમાસાદ્ય કૃષ્ણગઙ્ગાં સમાશ્રયત્ ।

દૃષ્ટ્વા સ્પૃષ્ટ્વા ચ વિધિવચ્શ્યામાં ગઙ્ગાં મહામુનિઃ ॥ ૨૫॥

સુવર્ણાર્ધાઙ્ગકે ગત્વા પરં તત્ર વિસિસ્મિયે ।
સૌવર્ણાર્ધાઙ્ગસ્તદ્વીક્ષ્ય યયૌ ભૂયો મહેશ્વરિ ॥ ૨૬॥

તત્ર વૈ શાણ્ડિલ્યમુનિઃ સુવર્ણાર્ધાઙ્ગ ઈક્ષિતઃ ।
સ દેશઃ પ્રથિતોઽદ્યાપિ સુર્વર્ણાર્ધાઙ્ગસંજ્ઞયા ॥ ૨૭॥

સુવર્ણાર્ધાઙ્ગકે દેશે સ્નાનદાનજપાર્ચનૈઃ ।
પુણ્યં પ્રાપ્નોતિ મનુજો વેદપારાયણે પ્રિયે ॥ ૨૮॥

તસ્માત્સર્વપ્રયત્નેન સુવર્ણાર્ધાઙ્ગકે કલૌ ।
સ્નાનં તત્ર વિશેષેણ બ્રહ્મહત્યાં વ્યપોહતિ ॥ ૨૯॥

મહાપાતકયુક્તો વા યુક્તો વાપ્યુપપાતકૈઃ ।
સ્નાત્વા શ્રીકૃષ્ણગઙ્ગાયાં મુચ્યેજ્જન્મશતોદ્ભવૈઃ ॥ ૩૦।

તતસ્તુ ગિરિમારુહ્ય મુનિઃ પરમકારુણઃ ।
પ્રતસ્થે દર્શનાકાઙ્ક્ષી દેવ્યાઃ પ્રાપદ્ધિ નાટકમ્ ॥ ૩૧॥

દદર્શ નાટકં તત્ર દેવીનાં વિસ્મિતો મુનિઃ ।
નમસ્કૃત્ય ચ દેવીનાં ગણં રઙ્ગમુપેયિવાન્ ॥ ૩૨॥

દેવ્યસ્તુ દૃષ્ટ્વા તત્રૈવ સુર્વર્ણાર્ધાઙ્ગકં મુનિમ્ ।
પરસ્પરમથોચુસ્તાઃ સુવર્ણાર્ધાઙ્ગકો મુનિઃ ॥ ૩૩॥

સર્વાઙ્ગસુન્દરો ભૂત્વા ગચ્છેદિતિ ન સંશયઃ ।
તથેત્યુક્ત્વા મહેશાનિ દેવીનાં ગણ ઉત્તમઃ ॥ ૩૪॥

નાટ્યં કૃત્વા તેન સહ તતોઽન્તર્ધાનમાગતઃ ॥

તત્ર દેવીગણં નાટ્યપરં દૃષ્ટ્વા સ વૈ મુનિઃ ॥ ૩૫॥

તન્નાલં પ્રકટીભૂતં રઙ્ગવાટ્યાં મહેશ્વરિ ।
દૃષ્ટ્વા દેવીવનં તત્ર રઙ્ગવાટ્યભિધં પરમ્ ॥ ૩૬॥

મુચ્યતે ઘોરપાપૌઘૈર્જન્મજન્માન્તરોદ્ભવૈઃ ।
તતો દૃષ્ટ્વાદ્ભુતં દિવ્યં રઙ્ગવાટાભિધં વનમ્ ॥ ૩૭॥

ગન્ધર્વનગરાકારં પ્રતસ્થે વિસ્મિતો મુનિઃ ।

તતોઽગ્રે તસ્ય દેવેશિ શાણ્ડિલ્યસ્ય મહામુનેઃ ॥ ૩૮॥

ગોસ્તમ્ભો હ્યભવત્તત્ર રઙ્ગદર્શનવિસ્મિતઃ ।
અનેલમૂકો હ્યભવદ્યત્ર વૈ વિસ્મિતો મુનિઃ ॥ ૩૯॥

તદ્વનં પ્રથિતં લોકે ગોસ્તમ્ભનસમાખ્યયા ।
ગોસ્તમ્ભનવનં દૃષ્ટ્વા સ્નાત્વા દત્ત્વા યથાવિધિ ॥ ૪૦॥

મુચ્યતે ઘોરહત્યાભિરિતિ સત્યેન તે શપે ।
તતો હ્યનેલમૂકઃ સ મુનિઃ પરમવિસ્મિતઃ ॥ ૪૧॥

પ્રાપ્ય તેજવનં નામ ગઙ્ગાતીરે દદર્શ સઃ ।
મુનિં ગૌતમમાસીનં ગત્વા નત્વા ચ ભૂરિશઃ ॥ ૪૨॥

અનેલમૂકં શાણ્ડિલ્યમપૃચ્છત્કૃપયા મુનિઃ ।
દૃષ્ટં કિમદ્ભુતં બ્રહ્મન્ તત્ર દિવ્યે મહાવને ॥ ૪૩॥

શક્તિપ્રસાદાત્ પ્રાપ્નોષિ વરમેતન્ન સંશયઃ ।
તમોભૂતસ્તમોરૂપસ્તામસસ્તામસોદ્ભવઃ ॥ ૪૪॥

સુવર્ણાઙ્ગો ભવાન્યસ્માત્ સંપન્નો દર્શનેન યઃ ।
સ એવાનેલમૂકોઽસિ વિસ્મયાદ્વિજસત્તમ ॥ ૪૫॥

સ્નાનાચ્ચ પરમં તેજઃ સ્થાનં પ્રાપ્સ્યસિ ચોત્તમમ્ ।
શ્રુત્વા તસ્ય વચો દિવ્યં સ્નાત્વા પુણ્યે ચ વારિણિ ॥ ૪૬॥

ગોસ્તમ્ભાન્મુક્તિમાસાદ્ય તેજઃ પરમવાપ્તવાન્ ।
તત્તેજઃ પરમં દૃષ્ટ્વા મુનિઃ શાણ્ડિલ્યનામકઃ ॥ ૪૭॥

ગૌતમં પ્રત્યુવાચૈનં તેજસ્વી પરમાદરાત્ ।
મુને કોઽયં પ્રભાવોઽસ્તિ ક્ષેત્રે યસ્ય પ્રભાવતઃ ॥ ૪૮॥

યસ્ય દર્શનતો જાતં મમ તેજઃ પરં મુને ।
શ્રુત્વા મુનેર્ગૌતમોઽપિ વચસ્તત્પરમં પ્રિયે ॥ ૪૯॥

પ્રત્યુવાચ મુનિં તત્ર કિમાશ્ચર્યેણ વૈ દ્વિજ ।
ઇતિ શ્રુત્વા પ્રસ્થિતશ્ચ ભૂયોઽગ્રે સુરસુન્દરિ ॥ ૫૦॥

યત્ર મુક્તો મહેશાનિ ગોસ્તમ્ભાત્સ મુનિઃ પરઃ ।
તેજઃ પરમકં પ્રાપ સ દેશઃ પાવનઃ સ્મૃતઃ ॥ ૫૧॥

તત્તત્તેજવનં નામ ક્ષેત્રં પરમપાવનમ્ ।
પ્રયત્નેન તુ તત્ક્ષેત્રે સ્નાતવ્યમમરેશ્વરિ ॥ ૫૨॥

મુચ્યતે ઘોરહત્યાભિઃ સ્નાનધ્યાનજપાર્ચનૈઃ ।
મહાપાતકયુક્તો વા યુક્તો વાપ્યુપપાતકૈઃ ॥ ૫૩॥

ઉત્તેજને મહાક્ષેત્રે મુચ્યતે ઘોરસઙ્કટાત્ ।
ઉત્તેજનસમં ક્ષેત્રં દિવિ ભુવ્યન્તરિક્ષકે ॥ ૫૪॥

ઘોરપાપહરં દિવ્યં ન ભૂતં ન ભવિષ્યતિ ।
તતો ગિરિં સમારુહ્ય શાણ્ડિલ્યઃ પ્રસ્થિતો મુનિઃ ॥ ૫૫॥

દૃષ્ટ્વાગ્રે ગણપં દિવ્યં વિઘ્નકર્તારમીશ્વરમ્ ।
પ્રસાદયિત્વા દેવેશં વિઘ્નાનાં નાયકં પરમ્ ॥ ૫૬॥

તદાજ્ઞયા જગામાગ્રે વનં પુણ્યમતન્દ્રિતઃ ।
દૃષ્ટ્વા પુણ્યં વનં દિવ્યં શારદાયા મહેશ્વરિ ।
તત્રાચરત્તપો ઘોરં દિવ્યવર્ષસહસ્રકમ્ ॥ ૫૭॥

દિવ્યવર્ષસહસ્રાન્તે શ્રીશૈલશિખરાત્પ્રિયે ।
શ્યામલા ધવલા દેવી રક્તા ચાવિર્બભૂવ હ ॥ ૫૮॥

દૃષ્ટ્વા તુ દેવીં તાં તત્ર શારાં વર્ષસહસ્રકમ્ ।
યસ્માદ્રક્તા ચ શ્યામા ચ શ્વેતા ચ વરવર્ણિનિ ॥ ૫૯॥

તસ્માત્પ્રોક્તા પુરાવિદ્ભિઃ શારદાનામનામતઃ ।
શિખરાગ્રે ચ દૃષ્ટ્વા તાં દેવીં ત્રિવિધવિગ્રહામ્ ॥ ૬૦॥

મુનિર્વિસ્મયમાપન્નસ્તસ્થૌ સ્મરણતત્પરઃ ।
શારીભૂતા યતો દેવી દૃષ્ટા તે નાત્ર સંશયઃ ॥ ૬૧॥

તતઃ પ્રોક્તા પુરાવિદ્ભિઃ શારદેતિ મહેશ્વરિ ।
શરત્કાલે યતો દેવી પૂજિતા સર્વજન્તુભિઃ ॥ ૬૨॥

તતઃ પ્રોક્તા પુરાવિદ્ભિઃ શારદાનામનામતઃ ।
શબલેતિ યતો દેવિ પ્રોક્તા ત્રિવિધવિગ્રહા ॥ ૬૩॥

શારદા નારદા ચૈવ વાગ્દેવીતિ ચ સોચ્યતે ।

નારદસ્યોપદેશેન યા દૃષ્ટા શ્યામલાઙ્ગકા || ૬૪||

સરસ્વતીતિ સા પ્રોક્તા વાક્સ્તમ્ભાન્મુચ્યતે યયા |
નિર્મલા યા ચ મુનિના દૃષ્ટા ત્રિવિધવિગ્રહા || ૬૫||

શ્રીશૈલશિખરે પુણ્યે શારદેતિ મતા ચ સા |
દૃષ્ટ્વા દેવીં તત્ર મુનિઃ પ્રણનામ ચિરં મુદા || ૬૬||

દણ્ડવત્પતિતો ભૂત્વા ગિરા પરમયૈડયત્ || ૬૭||

શ્રીશાણ્ડિલ્ય ઉવાચ |

દેવીં ચિદાનન્દમયીમજસ્રં વિશ્વાત્મિકાં વિશ્વપરાં જયન્તીમ્ |
તમોઽપહર્ત્રીં મનસા પરેશીં તાં શારદાખ્યાં શરણં પ્રપદ્યે || ૬૮||

પાપૈઃ શબલિતો યસ્માન્મોચિતોઽસ્મિ સ્વભાવતઃ |
તસ્માત્ત્વાં શારદાં નામ પ્રવદન્તિ મનીષિણઃ || ૬૯||

ચિદ્વિમર્શમહાશક્તિં પરમાનન્દદાયિનીમ્ |
શરણં દેવદેવેશીં ત્વામેવ ગતવાનહમ્ || ૭૦||

રજસ્તમોવ્યક્તરૂપામોમિત્યેકાક્ષરાત્મિકામ્ |
શરણં યામિ તાં દેવીં શારદાં શબલાં પરામ્ || ૭૧||

અઘોરાં ઘોરરૂપાં તાં ઘોરઘોરતરાં શુભામ્ |
શર્વાણીં ચાથ રુદ્રાણીં મૃડાનીં તાં નમામ્યહમ્ || ૭૨||

શતરુદ્રાં પરાં નિત્યાં શારદાં તાં નતોઽસ્મ્યહમ્ |
મહાકાલાગ્નિના ગ્રસ્તં જગત્ત્રાતુમિહોદ્યતા || ૭૩||

પરાસ્વરૂપાં પરમાં શારદાં તાં નતોઽસ્મ્યહમ્ |
મહાકાલાગ્નિરૂપાં તાં સૃષ્ટિસંહારકારિણીમ્ || ૭૪||

જગત્સ્થિતિકરીં દેવી શારદાં શરણં શ્રયે |
શ્યામાં શબલિતાપાઙ્ગાં શર્મદાં ભાર્ગવાર્ચિતામ્ || ૭૫||

નારદાનુગ્રહકરીં શારદાં શરણં શ્રયે |
વાક્સ્તમ્ભમોચનીં ભદ્રાં મહદુત્તેજનીં પરામ્ || ૭૬||

ગૌતમેનાર્ચિતાં દુર્ગાં શારદાં વરદાં ભજે |

ચિન્ત્યામચિન્ત્યાં ચેત્યાં ચ ચિદ્વિમર્શવિધાયિનીમ્ ॥ ૭૭॥

ચિદ્રૂપાં ચારુનયનાં શારદાં શરણં શ્રયે ।
ઘોરકાનનસંલીનાં ત્રિવિધાં ત્રિસ્વરૂપિણીમ્ ॥ ૭૮॥

શ્રીશૈલે ત્રિપુટાં દેવીં શારદાં તાં ભજામહે ।
કામક્રોધભયોન્માદગ્રસ્તમોક્ષવિધાયિનીમ્ ॥ ૭૯॥

ત્રિપુરાં ત્રિવિધાવાસાં શારદાં નારદાં ભજે ।
ભક્તાભયકરીં દેવીં વરચાપશરાઙ્કિતામ્ ॥ ૮૦॥

ત્રિશૂલખટ્વાઙ્ગધરાં ત્રિનેત્રાં ચારુહાસિનીમ્ ।
ષડ્ભુજાં ષડ્ગુણાં રમ્યાં ગુણાતીતાં ગુણાત્મિકામ્ ॥ ૮૧॥

પ્રકૃતિં વિકૃતિં દિવ્યાં શારદાં વરદાં ભજે ।
અતીતાનાગતાં દિવ્યાં મહામાયાસ્વરૂપિણીમ્ ॥ ૮૨॥

બ્રહ્મવિષ્ણુશિવાતીતપર્યઙ્કાસનસંસ્થિતામ્ ।
મહામોહપરિગ્રસ્તાં મહામોહસ્વરૂપિણીમ્ ॥ ૮૩॥

મોહાન્ધિતજનોદ્ધારાં શારદાં વરદાં ભજે ।
દીનાનાથપરિત્રાણપરાયણપરાયણામ્ ॥ ૮૪॥

માદૃક્પ્રપન્નપશુપાશવિમોચનીં તાં
સચ્ચિદ્વિમર્શવિમલાં પરમાર્થરૂપામ્ ।
માનપ્રમાતૃરહિતાં સ્થિતિમપ્રમેયાં
તાં શારદાં ભુવનકોશગતાં નતોઽસ્મિ ॥ ૮૫॥

ઇતિ સ્તુત્વા મહાદેવીં શાણ્ડિલ્યઃ કાનને શુભે ।
ચકાર સ મુનિસ્તત્ર તપઃ પાપનિબર્હણમ્ ॥ ૮૬॥

વાયુભક્ષો નિરાહારો દેવીદર્શનલાલસઃ ।
એવં સઞ્ચરતસ્તસ્ય દુશ્ચરં પરમં તપઃ ॥ ૮૭॥

જગામ સુમહાન્કાલો દેવી પ્રીતા બભૂવ હ ।
અત્રોપહારં વક્ષ્યામિ તચ્છૃણુષ્વ સુરેશ્વરિ ॥ ૮૮॥

સા ચ દેવી પ્રતુષ્યેત પશું દૃષ્ટ્વા વાર્ધ્રીણસમ્ ।
પશુરપિ પરાં મુક્તિં લભતે નાત્ર સંશયઃ ॥ ૮૯॥

વૈષ્ણવોઽપિ નરસ્તત્ર બ્રાહ્મણઃ ક્ષત્રિયોઽથવા ।
વૈશ્યો વાપિ પ્રકુર્વીત હોમં પશુપુરઃસરમ્ || ૯૦||

વૈષ્ણવો નૈવ ભુઞ્જીત વ્રતધારી તથૈવ ચ ।
માંસં વાર્ધ્રીણસસ્યાસ્ય ન દોષસ્તત્ર વિદ્યતે || ૯૧||

અમાંસભોજનઃ શમ્ભુસ્તુષ્યતે નાત્ર સંશયઃ ।
દેવી ચાપિ સુરેશાનિ સદા પ્રીતિકરા ભવેત્ || ૯૨||

મોદકૈર્મત્સ્યમાંસૈશ્ચ ગણનાથં પ્રપૂજયેત્ ।
ઇત્યેષ પટલો ગુહ્યો પાવનઃ પ્રીતિવર્ધનઃ || ૯૩||

તથા તપસિ સક્તસ્ય પ્રસન્નાભૂન્મહેશ્વરી ।
દેવી દુર્વાસસા સાર્ધં મુનિભિશ્ચ સમાયયૌ || ૯૪||

દૃષ્ટ્વા દેવીં પુરસ્તત્ર શાણ્ડિલ્યો દણ્ડવત્ક્ષિતૌ ।
પપાત પુનરુત્થાપ્ય દેવી શાણ્ડિલ્યમબ્રવીત્ || ૯૫||

શ્રીશૈલોપરિ શાણ્ડિલ્ય મત્પાર્શ્વે તુ ચિરં વસ ।
મદ્દર્શનાચ્ચ યત્પુણ્યં તદ્ભવદ્દર્શનાદપિ || ૯૬||

ઉત્તિષ્ઠ શીઘ્રં પુત્ર ત્વં મત્પાર્શ્વે સન્નિધિં કુરુ ।
દાસ્યામિ વેદાંસ્તત્રૈવ સાઙ્ગાનપિ ચ પુત્રક || ૯૭||

ત્રિસૃણાશ્ચૈવ મોક્ષ્યામિ સત્યં જાનીહિ માનદ ।
ઇત્યુક્ત્વા તત્ર શાણ્ડિલ્યં દેવદેવી મહેશ્વરી || ૯૮||

તત્રૈવાન્તર્હિતા ભૂત્વા શ્રીશૈલોપરિસંસ્થિતા ।
શાણ્ડિલ્યોઽપિ યયૌ તત્ર યત્ર દેવી પ્રતિષ્ઠિતા || ૯૯||

ગચ્છતસ્તસ્ય દેવેશિ શાણ્ડિલ્યસ્ય મહાત્મનઃ ।
અર્ધાઙ્ગં તુ સુવર્ણસ્ય બભૂવ કિલ સુન્દરિ || ૧૦૦||

અર્ધાઙ્ગં તુ સુવર્ણસ્ય દૃષ્ટ્વા હૃષ્ટો ભવન્ મુનિઃ ।
વિસ્મયં પરમં પ્રાપ્તો મનસૈતદચિન્તયત્ || ૧૦૧||

કિં મમાઙ્ગં સુવર્ણસ્ય ફલં કસ્યૈષ કર્મણઃ ।
રાષ્ટ્રસ્ય મહિમા કોઽપિ તથા તીર્થજલસ્ય ચ || ૧૦૨||

અથવા દેવદેવ્યાસ્તુ શારદાયાઃ પ્રસાદતઃ ।

ઇત્થં ચિન્તયતસ્તસ્ય શાણ્ડિલ્યસ્ય મહામુનેઃ ॥ ૧૦૩॥

વિસ્મિતસ્ય મહાદેવિ પિતરો દૃષ્ટિમાગતાઃ ।
દૃષ્ટ્વા પિતૃગણાંસ્તત્ર શાણ્ડિલ્યઃ પુરતઃ સ્થિતાન્ ॥ ૧૦૪॥

ઉવાચ વિસ્મિતઃ કે વૈ ભવન્તઃ પુરતઃ સ્થિતાઃ ।
કિમર્થમાગતા યૂયં બ્રૂતાગમનકારણમ્ ॥ ૧૦૫॥

ભવતાં કિઙ્કરશ્ચાસ્મિ અવિલમ્બેન સત્તમાઃ ।
બ્રૂતાગમનકૃત્યં મે સમુદ્યુક્તોઽસ્મિ તત્કૃતે ॥ ૧૦૬॥

પિતર ઊચુઃ ।

વયં તે પિતરઃ પુત્ર ક્ષીણાઃ સ્મોઽથ ચિરંસમાઃ ।
વર્ણસઙ્કરજાદ્દોષાચ્છુદ્ધવર્ણોઽસિ સાંપ્રતમ્ ॥ ૧૦૭॥

અધુના પાતુમિચ્છામસ્ત્વત્ત એવ જલાઞ્જલીન્ ।
દાતુમર્હસિ નઃ પુત્ર સિન્ધૌ શ્રાદ્ધમનુત્તમમ્ ॥ ૧૦૮॥

જલાઞ્જલિમપીદાનીમસ્માકં તૃપ્તિકારણમ્ ।
યોઽર્હઃ સન્નૈવ પિતૃણાં દદાતિ જલતર્પણમ્ ॥ ૧૦૯॥

શ્રાદ્ધં વાપિ મુનિશ્રેષ્ઠ સ દરિદ્રઃ પ્રજાયતે ।
નિરપત્યઃ કુલચ્છેદકારકશ્ચૈવ પુત્રક ॥ ૧૧૦॥

તસ્માદાર્યૈઃ સદા દેયઃ પિતૃભ્યસ્તુ જલાઞ્જલિઃ ।
શ્રાદ્ધં મધુઘૃતૈર્વાપિ ફલૈર્વા ગુડપાયસૈઃ ॥ ૧૧૧॥

તૂષ્ણીં બભૂવુર્દેવેશિ મુનિં પ્રોચ્ય પ્રહર્ષિતાઃ ।
પિતરસ્તે તદા સર્વે શાણ્ડિલ્યં પ્રાઞ્જલિં સ્થિતમ્ ॥ ૧૧૨॥

ભૈરવ ઉવાચ ।

શ્રુત્વા તેષાં વચઃ સૌમ્યં શાણ્ડિલ્યશ્ચાતિવિસ્મિતઃ ।
ઉવાચ પિતૄન્સંસ્તુત્ય વાચા પરમયા મુદા ॥ ૧૧૩॥

અધુનૈવ પિતૃગણાઃ સિન્ધૌ દાસ્યામિ વો જલમ્ ।
વપનં તુ કરિષ્યામિ પિતૃણાં શ્રાદ્ધશુદ્ધયે ॥ ૧૧૪॥

કૃત્વા હિ વપનં તત્ર શ્રાદ્ધં કુર્વન્તિ યે નરાઃ ।

તૃપ્તાઃ સ્યુઃ પિતરસ્તેષાં કર્તૃણાં ચ મહાફલમ્ ॥ ૧૧૫॥

ઇત્યેવમુક્ત્વા પિતૃભ્યસ્તાન્સન્તોષ્ય મહાતપાઃ ।
કૃત્વા તુ વપનં તત્ર શાણ્ડિલ્યો મુનિસત્તમઃ ॥ ૧૧૬॥

ચકાર વિધિવચ્છ્રાદ્ધં પિતૃભ્યસ્તૃપ્તિહેતવે ।
શાણ્ડિલ્યશ્ચૈવ દેવેભ્યઃ પિતૃભ્યશ્ચ દદૌ જલમ્ ॥ ૧૧૭॥

શાણ્ડિલ્યહસ્તાદ્દેવેશિ મહાસિન્ધુજલં તદા ।
ક્ષૌદ્રમેવ બભૂવાશુ પિતૃણાં તૃપ્તિકારણમ્ ॥ ૧૧૮॥

સિન્ધોઃ સ્રોતો મહાદેવિ મુનિહસ્તગતં યદા ।
અર્ધં ક્ષૌદ્રમયં જાતં પિતૃણાં તૃપ્તિહેતવે ॥ ૧૧૯॥

યદાપ્રભૃતિ શાણ્ડિલ્યઃ પિતૄન્સન્તૃપ્તવાન્ જલૈઃ ।
તતઃ સિન્ધુપ્રવાહસ્ય નામાભૂન્મધુમત્યપિ ॥ ૧૨૦॥

સુવર્ણો જગદીશાનિ શાણ્ડિલ્યો નામ વૈ મુનિઃ ।
બભૂવ પરમપ્રીતઃ પિતૃણાં તૃપ્તિકારણમ્ ॥ ૧૨૧॥

તતોઽગ્રે મધુમત્યાશ્ચ સિન્ધોઃ સઙ્ગમ એવ ચ ।
સ્નાત્વા ચ વપનં કૃત્વા શ્રાદ્ધં કૃત્વા મહેશ્વરિ ॥ ૧૨૨॥

સાક્ષાદ્ભૂતા મહાદેવી શાણ્ડિલ્યમિદમબ્રવીત્ ।
ભ્રાજમાનતનું ત્વાં યે વનેઽમુષ્મિન્પ્રતિષ્ઠિતમ્ ॥ ૧૨૩॥

માં ચાપિ ત્રિવિધાં ચાત્ર યે પશ્યન્તિ નરોત્તમાઃ ।
તે સિદ્ધાઃ કથિતાઃ પુત્ર પાપમુક્તા ન સંશયઃ ॥ ૧૨૪॥

મહાપાતકયુક્તો વા યુક્તો વાપ્યુપપાતકૈઃ ।
ક્ષેત્રં પીઠેશ્વરાખ્યં ચ દૃષ્ટ્વા મુચ્યેત કિલ્બિષૈઃ ॥ ૧૨૫॥

ઇત્યુક્ત્વા તં મુનિં દેવી તૂષ્ણીમાસ મહેશ્વરિ ।
તસ્માત્સર્વપ્રયત્નેન શારદાવનમાશ્રયેત્ ॥ ૧૨૬॥

ઘોષં ગત્વા ચ નુત્વા ચ ઘોષાવાસાઞ્જનાનપિ ।
ઉપોષ્ય રજનીમેકાં ષટ્તિસ્રો દ્વાદશૈવ વા ॥ ૧૨૭॥

આહ્વાનાર્ચનપાદ્યાર્ઘ્યમધુપર્કૈર્યથાક્રમમ્ ।
સંપૂજ્ય ભોજયિત્વા ચ મઙ્ગલોચ્ચારપૂર્વકમ્ ॥ ૧૨૮॥

સુવર્ણાઙ્ગં તતો ગત્વા તેજનીસિન્ધુસઙ્ગમે ।
વપનં વિધિવત્કૃત્વા શ્રાદ્ધં ચૈવ યથાવિધિ ॥ ૧૨૯॥

શાણ્ડિલ્યમધુમત્યોશ્ચ સઙ્ગમે લોકવિશ્રુતે ।
ષષ્ટિસ્તીર્થસહસ્રાણિ ષષ્ટિસ્તીર્થશતાનિ ચ ॥ ૧૩૦॥

કુર્વન્તિ સંનિધાનં ચ માસિ ભાદ્રપદે સદા ।
શુક્લપક્ષે ચતુર્થ્યાં ચ તથાન્યાસુ ચ સર્વદા ॥ ૧૩૧॥

ચતુર્દશ્યાં ચ શુક્લાયાં ત્વત્પ્રસાદાન્મહેશ્વરિ ।
ગોસ્તમ્ભનમથાભ્યર્ચ્ય પ્રવિશેન્મુનિકાનનમ્ ॥ ૧૩૨॥

મુનિં દૃષ્ટ્વા તતો દેવિ શારદાં ત્રિવિધાત્મિકામ્ ।
સંપૂજ્ય પરયા ભક્ત્યા ધૂપૈઃ કુસુમચન્દનૈઃ ॥ ૧૩૩॥

ક્ષીરખણ્ડાજ્યધૂપૈશ્ચ દીપૈઃ કર્પૂરવર્તિકૈઃ ।
નૈવેદ્યૈર્ઘૃતપક્વૈશ્ચ બલિદાનૈરનેકશઃ ॥ ૧૩૪॥

પૂજયેદ્વિધિના દેવીં વસ્ત્રાલઙ્કારભૂષણૈઃ ।
કુમારીઃ પૂજયેચ્ચાપિ તથા બ્રાહ્મણપૂજનૈઃ ॥ ૧૩૫॥

ગોદાનૈરશ્વદાનૈશ્ચ કન્થાવસ્ત્રાન્નભૂષણૈઃ ।
અક્ષયં ફલમાપ્નોતિ સત્યં સત્યં વરાનને ॥ ૧૩૬॥

અપુત્રિણઃ પુત્રાન્યોગ્યાન્નિર્ધનાશ્ચ ધનં બહુ ।
મૂર્ખશ્ચ શોભનાં વિદ્યાં રોગિણઃ સ્વાસ્થ્યમાપ્નુયુઃ ॥ ૧૩૭॥

સ્વર્ગં ચ નરકાદ્ભીતાસ્તથા મોક્ષં મુમુક્ષવઃ ।
શારદાં ગન્તુકામસ્ય ગૃહાત્પ્રભૃતિ સુન્દરિ ॥ ૧૩૮॥

પદાનિ ક્રમમાણસ્ય યાવન્તો ભૂમિરેણવઃ ।
પદે પદેઽશ્વમેધસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૧૩૯॥

ઉપોષ્ય રજનીમેકાં તિસ્રઃ ષડ્દ્વાદશૈવ વા ।
આહ્વાનાર્ચનપાદ્યાર્ઘ્યમધુપર્કૈર્યથાક્રમમ્ ॥ ૧૪૦॥

નૃત્તગીતૈસ્તથા વાદ્યૈર્ભોગૈર્દાનૈસ્તથા ગૃહૈઃ ।
હસ્ત્યશ્વરથયાનૈશ્ચ વાસોભિઃ શયનૈસ્તથા ॥ ૧૪૧॥

શારદાક્ષેત્રમાહાત્મ્યં નાલં વક્તું ચતુર્મુખઃ ।
શેષો નાલં ફલં વક્તું પ્રભાવં ચાપિ સુન્દરિ ॥ ૧૪૨॥

ઇતિ તત્કથિતં તુભ્યં યત્પૃષ્ટોઽહમિતિ ત્વયા ।
અધુના દેવદેવેશિ કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૧૪૩॥

ઇત્યેષ પટલો ગુહ્યો મહાપાતકહા કલૌ ।
શ્રુત્વા પઠિત્વા મુચ્યેત કોટિજન્મભવાદઘાત્ ॥ ૧૪૪॥

ઇતિ શ્રીભૃઙ્ગીશસંહિતાયામુત્તરવિષયોપજાતતીર્થસઙ્ગ્રહે
શારદામાહાત્મ્યં સમાપ્તમ્ ॥

Shankara processed.
Proofread by P. P. Narayanaswami swami at mun.ca, PSA Easwaran

.. shrIshAradAmAhAtmyam ..
was typeset using XƎLATEX 0.99996
on January 4, 2017

Please send corrections to *sanskrit@cheerful.com*